# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -शास्त्रितृतीयवर्षम् (SEM-5) | प्रश्नपत्रम् – ८ | गुणाः - ७० |
| विषयः - स्वामिनारायणवेदान्तः - J | (C.E.- 3.5.10. New ) | |
| दिनाङ्कः - १२/१२/२०१८ | छान्दोग्योपनिषत् | समयः -१०.०० तः १.०० |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम् । (१०)**

(१) छान्दोग्योपनिषदः शान्तिमन्त्रं व्याख्यात ।

(२) छान्दोग्योपनिषदः प्रथमप्रपाठकस्य खण्डचतुष्टयस्य विषयान् संगृह्णीत ।

(३) द्वितीयप्रपाठकस्य नवमखण्डोक्तरीत्या सप्तविधसाम्नि आदित्यदृष्टिः कथं कर्तव्या ?

**प्रश्नः २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत । (१०)**

(१) आख्यायिकामुखेन उद्गीथाक्षरस्य परोवरीयस्त्वोपासनम् उपवर्णयत ।

(२) लोकादिदृष्ट्या पञ्चविधस्य साम्नः उपासनप्रकारमुपपाद्य तत्तत्फलं च प्रतिपादयत ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव प्रश्नौ समाधेयौ । (१०)**

(१) मिथुने वामदेवोपासनं तत्फलञ्च यथाग्रन्थमुपपादयत ।

(२) त्रयीविद्यां यथाभाष्यमुपवर्णयत ।

(३) प्रथमामृतस्य वसूनामुपजीव्यत्वं निरूपयत ।

**प्रश्नः ४ निम्नलिखितेषु प्रश्नेष्वेक एव समाधेयः । (१०)**

(१) द्वितीयप्रपाठकस्य द्वाविंशतिखण्डोक्तदिशा गानविशेषोपदेशम् उपवर्णयत ।

(२) मधुविद्यां यथाग्रन्थमुपपादयत ।

**तृतीयान्वितिः**

**प्रश्नः ५ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम् । (१०)**

(१) ब्रह्मणः मनोमयत्वादिगुणाः के ? स्पष्टयत ।

(२) सत्यकामस्य प्रतिज्ञा का ? स्पष्टयत ।

(३) प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति मन्त्रं व्याख्यात ।

**प्रश्नः ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत । (१०)**

(१) सफलम् अक्षिपुरुषविद्याम् उपदर्शयत ।

(२) मधुविद्यासम्प्रदायोपक्रममुपवर्णयत ।

## चतुर्थान्विति:

**प्रश्नः ७ अधोनिर्दिष्टेषु प्रश्नेषु केचन दशप्रश्नाः समाधेयाः ।** **( १० )**

(१) छान्दोग्योपनिषत् कस्मिन् वेदे उपलभ्यते ?

(२) ओंकारः रसतमः कथम् ?

(३) प्रथमप्रपाठके कति खण्डाः भवन्ति ?

(४) छान्दोग्योपनिषदि कति प्रपाठकाः सन्ति ?

(५) मृत्युशब्देन कोऽभिधीयते ?

(६) रैक्वब्रह्मर्षेः आख्यायिका कस्मिन् प्रपाठके आयाति ?

(७) आदित्ये का दृष्टिः कर्तव्या ?

(८) "सर्वं खल्विदं ब्रह्म तज्जलानिति" इतीयं श्रुतिवाक्यं कस्यां विद्यायामायाति ?

(९) ब्रह्मसंस्थः कः ?

(१०) त्रयीविद्यायां के त्रयः ?

(११) चतुष्पदा का ?

(१२) प्रायश्चित्तार्थं कीदृशहोमविधानम् ?

(१३) भामनीः - इति पदस्य कोऽर्थः ?

(१४) अक्षिपुरुषविद्या कस्मिन् प्रपाठके समायाति ?

(१५) सत्यकामः कस्य पुत्रः ?

--००--